# अहिंसा परमो धर्मः।

**डॉ. जयंत नारळीकर**

अस्ति महाराष्ट्रे प्रदेशे मुंबापुरी नाम्नी महानगरी। तत्र शरदो बालकः स्वमात्रा पित्रा भगिन्या सह प्रतिवसति स्म। जन्मतः एव उत्तुङ्गदेहः असौ समवयस्केषु बालकेषु उदग्रः प्रत्यभासत। पाठशालायां तस्य वर्गबान्धवाः गृहसमीपवर्तिनः क्रीडासुहृदश्च तस्य बृहदाकारेण भीताः सन्तः तेन विरोद्धुं नोत्सहन्ते स्म। अतः स्वाभाविकं यत् शरदः मदावलिप्तः जातः। तस्य दमनेन पीडिताः अन्ये बालकाः तं परित्यज्य अन्यत्र स्वक्रीडामाचरन्ति स्म।

''परित्यक्तोऽस्मि स्वसुहृद्भिः, अपि किमर्थम्?'' पृष्टवानसौ स्वमातामहम्। ''आजोबा, त्वदन्यः मम प्रश्नस्य उत्तरकर्ता न कोऽपि विद्यते।''

आजोबाः प्रहसन्निदमुवाच। ''वत्स! तव सुहृदः त्वत्तः बिभ्यति। उत्तुङ्गदेहोपेतस्त्वं बलवत्तरोऽसि स्वमित्रेभ्यः। स्वबलेन त्वं तेषामुपरि स्वनिर्णयान् निवेशयसि। बलादेवं नियोजिताः सन्तः ते अनिच्छया तव वचनं कुर्वन्ति। हिंसया विवादस्य निराकरणं सम्यक्तया न भवति।''

''जाने, जाने! भवतः मत्कृते कः उपदेशः?'' पृष्टवान् शरदः।

''अहिंसा परमो धर्मः।'' उवाच मातामहः। ''शृणु! यदि तव मित्रं कार्लस्त्वां वामकपोले स्वमुष्ट्या ताडयेत् तर्हि त्वं किं करिष्यसि?''

शरदः उच्चैः हसन्नुवाच ''आजोबा! तर्हि अहं तस्योपरि मुष्टिवर्षां करिष्ये!''

''नायम् अहिंसामार्गः, अपि तु इयं हिंसा! त्याज्यास्ति सा संपूर्णतया। अहिंसामार्गे त्वया कार्लः आमन्त्रितव्यः तव दक्षिणकपोले मुष्टिताडनार्थम्।'' आजोबा उवाच।

''न भाति व्यवहार्योऽयं मार्गः। परंतु भवता प्रेरितः अहं यतिष्ये'' इति शरदः आश्वासयामास।

आजोबाबोधं विचारयन् शरदः क्रीडनार्थं खेलोद्यानम् अगच्छत् तत्र तस्य सुहृद् कार्लः तं प्रतीक्षमाणः हिन्दोलमारोहितः। शरदम् उद्दिश्य असौ अघोषयत्।

''विलम्बेन प्रभाविताः सर्वेऽपि ते व्यवहाराः। अधुना विगतार्धघटिकां यावद् अहं तव प्रतीक्षां करोमि।''

''असत्यवदनं तव स्वभावधर्मः। कालमापको न वर्तते तव हस्तोपरि। घटिकाकालखण्डं कथं निश्चितं करोषि? हन्त! अवतर हिन्दोलात्'' इति आज्ञापयामास शरदः।

''न करिष्ये वचनं तव।'' उवाच कार्लः आरभमाणः बालसुलभं विवादम्। शरदः कार्लं हिन्दोलात् निष्पातयामास। क्षुब्धमनस्कः कार्लः शरदस्य कपोलोपरि मुष्टिप्रहारं कृतवान्। सपदि स्वकीयां ह्रस्वाकृतीं शरदस्य दीर्घदेहतां अनुभवन्नसौ विग्रहं परित्यज्य पलायनमकरोत्। द्रुतगामी शरदस्तु शीघ्रमेव तमग्रहीत्।

रोदनपरे कार्ले मुष्टिप्रहारं कर्तुकामः शरदः सहसा आजोबावचनम् अस्मरत्। अहिंसामार्गेण गन्तुमनाः असौ कार्लं सौम्यस्वरेण आवाहनमकरोत्।

''मित्र! नाहं रुष्टस्तवोपरि यत्त्वया मम वामकपोले मुष्टिप्रहारः कृतः। त्वामहं आमन्त्रये तत्समप्रहारमेककर्तुं मम दक्षिणकपोले।''

स्तिमितः कार्लः उवाच ''अपरिहासेन वदसि?''

''सत्यम्। नात्रास्ति कोऽपि परिहासः।'' उदतरत् शरदः।

हृदये धैर्यं निधाय कार्लः शरदेन पुरस्कृते दक्षिणकपोले मुष्टिप्रहारं कृत्वा पलायनमकरोत्। द्वाभ्यां प्रहाराभ्यां पीडितः क्षुब्धः शरदः आजोबाबोधं स्मरन् महत्प्रयासानीतस्मितेन व्याप्तं वदनं धारयन् स्वगृहं प्रति चलितवान्। अहिंसामार्गः नास्ति सहजसुलभः इति तेन अनुभूतम्।

तदोत्तरकाले शरदमित्रसमुदाये लोकप्रवादः प्रचरितः यदसौ उत्तुङ्गकायः कुमारः भीरुस्वभावः वर्तते। ताडितोऽपि प्रतिताडने न प्रेरितः। यः कश्चिदपि लघ्वाकृतिः बालः निर्भयवृत्त्या तस्योपरि आघातान् अकरोत्। शरदोऽपि स्थिरवृत्त्या तान् असहत। अपरमसौ आक्रमकवृत्तिं बालकमेकं समुपगतं दृष्ट्वा ततः पलायनमकरोत्। तस्य भीरुतां दृष्ट्वा भगिनी मल्लिका उवाच

''कुतस्त्वा कश्मलमिदं सहसा समुपस्थितम्।
अनार्यजुष्टं शरद ह्यकीर्तिकरमेव च॥
क्लैब्यं मा स्म गमस्तात नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ सुविक्रम॥
स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् कुमारस्य न विद्यते॥
अथ चेत्त्वमिमं धर्म्यं विग्रहं न करिष्यसि।

ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि॥
कुमारीत्यभिभाषेरन् त्वां सर्वे हि पुनः पुनः॥
कुमारस्य न चाकीर्तिरितस्मादतिरिच्यते॥
अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्॥''

एतच्छ्रुत्वा शरदः प्रत्युवाच ''ताई!
सर्वमेतदृतं मन्ये यन्मां वदसि मल्लिके।
आजोबावचनेनाहमहिंसाव्रतमास्थितः॥

''किमस्ति इदं व्रतम्?'' पृष्टवती मल्लिका। शरदस्ताम् आजोबावचनं ससंदर्भमकथयत्। तत् श्रुत्वा प्रहसन्ती मल्लिका उवाच ''बाढम्। अपि तु तात किं त्वं न जानासि यत् -

अहिंसा परमो धर्मः न तु क्लैब्येन प्रेरितः।
पश्याहिंसाव्रतो मुष्टियोद्धा ताडनमाश्रयत्॥

''कथमेतत्?'' पृष्टवान् शरदः। ''श्रुणु'' उक्तवती मल्लिका।

पुरा आङ्ग्लेदेशे लंडनमहानगरस्य पूर्वविभागे पीटरः नाम एको मुष्टियोद्धा प्रतिवसति स्म। अनेकप्रतियोगिताविजयेन तस्य मुष्टियुद्धकलासिद्धिः सुविख्याता बभूव। पीटरस्य सुहृदस्तु तस्य शीघ्रकोपवृत्त्या पीडिता आसन्। तेन सह संभाषणे यदि कोऽपि विवादः सञ्जातः तर्हि पीटरः मुष्टिप्रहारेण स्वमतं प्रस्थापयति स्म। क्रमशः पीटरस्य सुहृत्समूहः आकुञ्चित नष्टप्रायः अभवत्। मित्रलोपेन चिन्तितः असौ स्वचर्चस्य धर्मगुरुम् अभिगम्य स्वदशां विस्तरेण निरूपयन् पृष्टवान् ''महाभाग! केन मार्गेण अहं स्वसुहृदः आकर्षितुं शक्नोमि?''

धर्मगुरुरुवाच ''अहिंसामार्गेण गन्तुमर्हसि, वत्स। विवादे स्वमतस्य पुष्टिः तर्कन्यायशास्त्रेण कर्तव्या, न तु मुष्टिप्रहारेण। किंबहुना,
अक्रोधेन जयेत्क्रोधमसाधुं साधुना जयेत्।
जयेत्कदर्यं दानेन सत्येनानृतवादिनम्॥

यदि कोऽपि वराकः क्रोधातिशयेन तव वामकपोलं प्रहरेत्, तर्हि त्वया दक्षिणकपोलः पुरस्कर्तव्यः, आमन्त्रितव्यश्चासौ यत्प्रहरेमं कपोलम् इति।''

पीटरः अविश्वासेन व्याप्तः सन् पृष्टवान् ''अनेन अहिंसामार्गेण किमहं स्वोद्दिष्टमवाप्तुं शक्नोमि?'' इति ।

धर्मगुरुः प्रत्युवाच ''कठिनोऽस्ति अहिंसामार्गः परन्तु तस्य सफलता इतिहाससिद्धा। पुरा भारतदेशः ब्रिटनस्याधिपत्यात् स्वातन्त्र्यमलभत अनेनैव अहिंसामार्गेण। तस्य पुरस्कर्ता गांधीमहात्मा 'अहिंसा परमो धर्मः' इति ध्येयवाक्यम् अवलम्ब्य ब्रिटिशसाम्राज्यप्रतीकारे सफलः अभवत्।''

गांधीमहात्मनः कीर्तिं जानन्नसौ मुष्टियोद्धाऽपि अहिंसामार्गेण गन्तुं यतवान्। अपि तु तस्य सुहृदः अन्येऽपि जनाः तस्य प्रतीकारशून्यतां दृष्ट्वा तस्य परिहासं कृतवन्तः। तेषाम् आक्रमणं परिहर्तुं पीटरः अनेकदा पलायनमकरोत्। नैतदाश्चर्यं यत् पीटरः 'भीरुक'संज्ञया विश्रुतः।

''कठिनोऽस्ति अहिंसामार्गः। किमहम् अस्याचरणे प्रमादं करोमि, यत् सर्वेऽपि जनाः मां प्रति परिहासं दर्शयन्ति?'' इति चिन्तयन् असौ धर्मगुरोः बोधमाप्तुं तस्य प्रार्थनागृहं गतवान्। प्रार्थनागृहसमीपे तेन अद्भुतं दृश्यं दृष्टम्। एकः तस्करः धर्मगुरोरुपरि मुष्टिप्रहारं कृत्वा तस्य क्षुद्रकोषं झटिति ग्रहीतुं प्रवृत्तः। अयं सात्त्विकः साधुपुरुषः स्वरक्षणाय असमर्थः इति विचार्य पीटरः धर्मगुरोः साहाय्यार्थं गन्तुकामः। परन्तु घटनाक्रमेण स्तिमितः सः अपश्यत्... धर्मगुरुः तस्करोपरि मुष्टिप्रहारं कृतवान्! प्रहारस्य गुणवत्तां दृष्ट्वा पीटरः तारस्वरेण प्रशंसयामास ''साधु! साधु! महाशय, भवान् मुष्टिविद्यायां निपुणः। पुनरपि प्रहर्तव्यः नीचपुरुषोऽयम्।'' इति।

तस्करस्तु धर्मगुरोः प्रतीकारेण त्रस्तः सन् स्थानात्तस्मात् पलायनमकरोत्। धर्मगुरुः लज्जितमानसेन उवाच ''दृष्टं त्वया यद् मया मोहाद् अहिंसामार्गः त्यक्तः। पश्चात्तापदग्धोऽस्मि ममाविवेकेन।''

''नहि, नहि महाशय'' उवाच पीटरः प्रफुल्लितमानसः ''भवता आचरणेन दर्शितः निर्दोषः अहिंसामार्गः। अहिंसया गन्तुकामः क्वचित्प्रसङ्गे हिंसाम् आचरितुमर्हति। किमर्थम्? एतद्दर्शयितुं यत् अहिंसाऽचरणम् क्लैब्येन न प्रेरितम्। अपि तु तत्सामर्थ्योपरि आधारितम्। अहमपि अतःपरम् अनेन निर्दोषेण अहिंसामार्गेण गन्तुं यतिष्ये।''

एतत् श्रुत्वा शरदः स्वगृहात्क्रीडनार्थं बहिरायातः। क्रीडासंकुलमार्गे कार्लस्य

गृहं प्राप्तः। कार्लः अलिन्दात् मार्गस्थान् निरीक्षमाणः आसीत्। शरदं दृष्ट्वा असौ तमाह्वयत् ''मित्र, प्रतिपालय मां मम गृहद्वारे। सपदि अहम् अवरुह्य तत्र आगमिष्ये। तव कपोलं प्रहर्तुं मम मुष्टिः समुत्सुका।'' इत्युक्त्वा कार्लः बहिरागन्तुं प्रवृत्तः शरदोऽपि स्मितवदनेन तस्य समुचितं स्वागतं कर्तुं सिद्धः।

''सुस्वागतं सखे। संप्रति अयमस्ति मे वामकपोलः तव मुष्ट्याः मीलनोत्सुकः।'' कार्लं दृष्ट्वा शरदः कपोलं पुरस्कृत्य आह्वयत्। कार्लस्तु आसन्नं प्राप्तः सहसा शरदेन प्रचण्डेन मुष्टिप्रहारेण भूमौ प्रक्षिप्तः। स्तिमितः व्यथितश्च असौ घराकः अपृच्छत् ''शरद! विस्मृतस्त्वया अहिंसामार्गः?''

''न विस्मृतः, मित्र, अपि तु सुष्ठु बोधितः।'' शृणु -

अहिंसा परमो धर्मः न तु क्लैब्येन प्रेरितः।
स्वरक्षणाय मे मुष्टिः न प्रहर्तुमनागसि॥

''अस्माभिः किमुपादेयं युद्धं वा बुद्ध एव वा? ।
दिनेष्वेतेष्वयं प्रश्नः पौनःपुन्येन पृच्छ्यते ॥
अनभिज्ञा वयं न स्मः अहिंसा-शान्ति-तत्त्वयोः ।
शान्तिमन्त्रस्य घोषास्तु न शक्ता देशरक्षणे ॥
समृद्धिवर्धनार्थाय अवश्या एव योजनाः ।
यास्यन्ति व्यर्थतां तास्तु शस्त्रसंरक्षणेऽसति ॥
न शान्तेर्मन्त्रपाठैर्हि आङ्ग्लराज्यमवासदत् ।
सुभाष-युद्ध-दण्डेनाहतं तच्चूर्णतामयात् ॥
अतो नवनवास्त्राणि अन्विष्यान्विष्य हिन्दुभिः ।
विधेयः सर्वथाऽस्माकं देशः संरक्षणक्षमः ॥

डॉ.ग.बा. पळसुले - वैनायकम् (२२.१४१-१४५)